# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## प्रवेशपरीक्षा

## प्रथमपत्रिका

दिनाङ्कः - 01-02-2026 अङ्काः - 100

पूर्वाह्णे – 10:00 वादनतः 1:00 वादनपर्यन्तम् समयः – घण्टात्रयम्

<u>सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि</u>

**1. अष्टानाम् एकवाक्येन उत्तरं लिखत । 8**

१. विद्याधरीश्रद्धाकामुकः कः ?

२. नृपतिः सिद्धवेषधरस्य लीलाः केभ्यः अशृणोत् ?

३. चन्द्रापीडः कः ?

४. कः कमलजदयितां शृङ्गशैले संस्थाप्य अर्चां प्रचक्रे ?

५. वित्तमदमत्तचित्ताः राजानः कम् अभिनन्दन्ति ?

६. भारतसङ्ग्रहः केन विरचितः ?

७. काशीराजपुत्र्याः चेट्याः नाम किम् ?

८. भवभूतेः पितामहस्य नाम किम् ?

९. प्रथमं जातं कः नित्यं क्रोडीकरोति ?

१०. मरुतः सुतः कः ?

**2. षण्णां द्वित्रैः वाक्यैः उत्तरं लिखत । 12**

१. प्रभाकरवर्धनो दिनकरसेवां कथं चकार ?

२. जामदग्न्यः विधिवदुपसन्नं भीष्मं किमित्याशशासे ?

३. लक्ष्मीवन्तः दोषानपि गुणपक्षं कथमध्यारोपयन्ति ?

४. अप्सरसामाक्रोशं श्रुत्वा पुरूरवाः किमकरोत् ?

५. रामः चन्द्रकेतुना सहागतं लवं दृष्ट्वा किमचिन्तयत् ?

६. शङ्खचूडः जीमूतवाहनस्य चरितं जगद्विपरीतमिति कथं प्रतिपादयति ?

७. भैरवाचार्यो राजानमुपह्वरे किमवादीत् ?

८. सिद्धवेषधरम् ईश्वरं वर्णयत ।

**3. त्रयाणां सप्ताष्टैः वाक्यैः उत्तरं लिखत ।** 9

१. मदस्य अनर्थहेतुत्वम् उपपादयत ।

२. पुष्पभूतिः भैरवाचार्यस्य सहायं कथं चकार इति वर्णयत ।

३. अभिनवशङ्करैः कमलजदयिताष्टके किं किं प्रार्थितम् ?

४. भीष्मः "कन्याहरणे ममापराधो नास्ति" इति कथमुपपादितवान् ?

५. शिलागजस्य इक्षुभक्षणवृत्तान्तं विवृणुत ।

**4. वाक्यत्रयं सप्रसङ्गं विवृणुत ।** 9

१. भुजे वीर्यं निवसति न वाचि ।

२. प्रायेण परोत्कर्षासहिष्णवो हि लोकाः ।

३. न तितिक्षासममस्ति साधनम् ।

४. वीरो रसः किमयमेत्युत दर्प एव ।

५. स्मयमानः स तदन्वमन्यत ।

**5. पद्यद्वयं पूर्णं लिखत ।** 6

१. सच्चित् ........................... देहि मह्यम् ॥

२. शुचि ........................... भूषणः ॥

३. शिवम् ........................... जिगीषवः ॥

**6. एकस्य पद्यस्य सान्वयम् अर्थं लिखत ।** 4

१. बाष्पवर्षेण नीतं वो जगन्मङ्गलमाननम् ।
अवश्यायावसिक्तस्य पुण्डरीकस्य चारुताम् ॥

२. शयितेन मातुरङ्के विश्रब्धं शैशवे न तत् प्राप्तम् ।
लब्धं सुखं मयास्या वध्यशिलाया यदुत्सङ्गे ॥

**7. एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत ।** 4

१. कालिदासः २. नीलकण्ठदीक्षितः

8. **चतुर्णां रूपाणि परिचाययत ।** 4

| | | |
|---|---|---|
| १. आज्ञापयति | २. धनुः | ३. आपदाम् |
| ४. अनुशयी | ५. जराम् | ६. आशीः |

9. **चत्वारि पदानि वाक्ये योजयत ।** 4

| | | |
|---|---|---|
| १. तेजस्वी | २. अम्भः | ३. तोकम् |
| ४. हन्ति | ५. निन्द्यसे | ६. पुरः |

10. **चतुर्णां पर्यायपदानि लिखत ।** 4

| | | |
|---|---|---|
| १. दार्षदः | २. काण्डपृष्ठः | ३. प्रतिपत्तिः |
| ४. रोधः | ५. दारिकाः | ६. वाजी |

11. **चतुर्णां सन्धिं विभज्य नाम लिखत ।** 6

| | | |
|---|---|---|
| १. व्याधगीतिरिन्द्रियमृगाणाम् | २. अनिर्मूढोऽसि | ३.तन्निशम्य |
| ४. भवांस्तूष्णीमास्ते | ५. साधूपदिष्टम् | ६. सिञ्चतीव |

12. **चतुर्णाम् एकं पदं लिखत ।** 4

| | | |
|---|---|---|
| १. दुःखेन अवाप्तुं योग्या | २. धनुषः मध्यभागः | ३. उत्तरः कालः |
| ४. अकुटिलः युद्धव्यापारः यस्य | ५. करुणया रहितः | ६. जेतुम् इच्छवः |

13. **चतुर्णां व्याकरणविशेषं लिखत ।** 8

| | | |
|---|---|---|
| १. वात्या | २. राजकम् | ३. विजयेताम् |
| ४. दाक्षिणात्यः | ५. जलनिधिमयः | ६. अवतिष्ठन्ते |

14. **चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत ।** 8

| | | |
|---|---|---|
| १. भूमिपालः | २. देहदार्ढ्यम् | ३. अर्धपथे |
| ४. कूश्माण्डविनायकादयः | ५. कोपपरीतमानसम् | ६. शस्त्राशस्त्रि |

**15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत ।** **6**

१. परिष्वजताम्  २. सिषेवे  ३. समुपेक्षेत  ४. अपृच्छत्

**16. चतुर्णां रिक्तस्थानानि पूरयत ।**

**4**

१. ________________ कार्यदर्शीत्यभिधीयसे ।

२. स्वान्येव ________________ तपोमयानि ।

३. एषा ________________ रत्नद्युतिरञ्जिता भाति ।

४. काश्या सहस्ततालं ________________ ननर्त ।

५. स्थाण्वीश्वरजनपदः वसुधारेति ________________ अगृह्यत ।

-------------------------